# संस्कृत वार्ता:

दिनाङ्क : 14/03/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा नरेन्द्रमोदिना असमे सिल्चरे पञ्चशदोत्तर-पञ्चाशदधिक -त्रयोविंशति: कोट्यधिक-विविधा: विकास-परियोजना: शुभारम्भिता:।
- प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्यापराह्णे कोलकातायां आहत्य अशीत्युत्तर-षडधिक-अष्टादश-सहस्रकोट्यधिक-विविधा: विकास-परियोजना: लोकाय समर्पिता:, शिलान्यसिता: च ।
- सर्वकारेण गृहेभ्यः, चिकित्सालयेभ्यः, शैक्षणिकसंस्थाभ्यः अन्याभ्यः अत्यावश्यकसेवाभ्यश्च अबाधितरूपेण तैलेन्धनस्य आपूर्तेः आश्वासनं दत्तम् अस्ति।
- सर्वकारेण तत्कालप्रभावेण सोनमवांगचुकस्य प्राशासनिक-निरोधः प्रत्याहृतः, यः गतवर्षस्य सितम्बरमासे राष्ट्रियसुरक्षाधिनियमस्य अन्तर्गतं निरुद्धः आसीत्।
- गत-रात्रौ एकम् ईरानीय-प्रक्षेपास्त्रम् इराकदेशस्य बगदादनगरे स्थितम् अमेरिकी-दूतावासम् प्रहृत्य तस्य विशाले प्राङ्गणे स्थितं 'हेलिपैड' इति उदग्रयान-स्थानकं क्षतिग्रस्तं कृतवत्।
- महिला-हॉकी-क्रीडायां भारतम् अद्य सायंकाले ऐषमः वर्षस्य एफ.आई.एच हॉकी-विश्वचषक-भागयोग्यता-क्रीडा इत्यस्याः अन्तिमे द्वन्द्वे इङ्ग्लैण्ड-दलेन सह क्रीडिष्यति।

---

<u>प्रधानमन्त्री-कोलकाता</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्यापराह्णे कोलकातायां आहत्य अशीत्युत्तर-षडधिक-अष्टादश-सहस्रकोट्यधिक-विविधा: विकास-परियोजना: लोकाय समर्पिता:, शिलान्यसिता: च । अवसरे अस्मिन् प्रवदन् प्रधानमन्त्री प्रोक्तवान् यत् एता: परियोजना:, पश्चिमबंगाय, पश्चिमीय-भारताय च बहु-लाभप्रदा: भविष्यन्ति।

गत-रात्रौ एकम् ईरानीय-प्रक्षेपास्त्रम् इराकदेशस्य बगदादनगरे स्थितम् अमेरिकी-दूतावासम् प्रहृत्य तस्य विशाले प्राङ्गणे स्थितं 'हेलिपैड' इति उदग्रयान-स्थानकं क्षतिग्रस्तं कृतवत्। ईरानीय-राज्य-प्रसारकेण सूचितं यत् बगदाद-स्थित-अमेरिकी-दूतावासे रडार-प्रणालीं लक्ष्यं कर्तुम् एकस्य आत्मघाति-ड्रोन-यानस्य उपयोगः कृतः आसीत्। लेबनान-देशे नगरस्य दक्षिणभागे एकस्मिन् स्वास्थ्यकेन्द्रे इस्राएल-देशस्य आक्रमणेन द्वादश-संख्यकाः चिकित्सा-कर्मकराः हताः। अमेरिका-देशस्य राष्ट्रपतिः डोनाल्ड ट्रम्पः एकस्मिन् सामाजिक-संचार-पटले सन्देशे उक्तवान् अस्ति यत् सम्पूर्णे पश्चिम-एशिया-क्षेत्रे आधिपत्यं स्थापयितुम् इस्रायल-देशं नाशयितुं च ईरान-देशस्य महत्त्वाकाङ्क्षा आसीत्, परन्तु तेन उद्घोषितं यत् ताः योजनाः इदानीं नष्टाः सन्ति।

---------------------------------------------------

**ऋतुविकास:**

भारतीय ऋतु-विज्ञान-विभागेन प्रोक्तं यत् झारखण्डे श्व: उष्ण-लहर्य्या: प्रकोप: प्रभावि भविष्यति। अरूणाचल प्रदेश-असम-मेघालये मार्च पञ्चदशे दिनांके भीषण-वृष्टे: संभावना अपि वर्तते। एतिदतिरिच्च बहुषु क्षेत्रेषु दिल्ली-पञ्जाब-उत्तरप्रदेश-हरियाणा-चंडीगढ़-हिमाचलप्रदेश-जम्मू-कश्मीर लद्दाख-उत्तराखण्डे च ओलावृष्टि: अपि संभाव्यते। अन्ये च पूर्वोत्तरीय राज्येषु वृष्टे: अनुमानोऽभि व्यक्त:।

---------------------------------------------------

**हॉकी-क्रीडा:**

महिलाहॉकीक्रीडायां भारतम् अद्य सायं तेलङ्गाना-राज्यस्य हैदराबादनगरे जी. एम. सी. बालयोगी-हॉकी-क्रीडाङ्गणे ऐषमः वर्षस्य एफ.आई.एच हॉकी-विश्वचषक-भागयोग्यता-क्रीडा इत्यस्याः अन्तिमे द्वन्द्वे इङ्गलैण्ड-दलेन सह क्रीडिष्यति। स्पर्धा सायं सार्धसप्तवादने समारप्स्यते। अन्तिमक्रीडां यावत् उभे अपि दले अपराजिते स्तः।

गत-रात्रौ सलीमा-टेटे-महोदायायाः नेतृत्वे भारतीयदलम् इटली-देशं एक-शून्य अङ्केन पराजित्य अन्तिमचक्रे प्रवेशम् अकरोत्। चत्वारिंशत्तमे निमेषे भारतस्य मनीषा-चौहानः विजय-गोलकं साधितवती।

।। इति वार्ता: ।।